


अगस्त तः सितम्बर २०२२ पर्यन्तम्

श्रावण-शुक्ल-चतुर्थी तः आश्विन-शुक्ल-पंचमी पर्यन्तम्

(वै-२०७९)

RNI
DELSAN/2013/50379

ISSN:2347-1565


# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका


वर्षम्-१० संयुक्ताङ्कः-१-२



सम्पादकः

डॉ. अरुण कुमार झा

सचिवः

एक साहित्यिक त्रैमासिक पत्रिका
एवं
समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति
तथा
सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं
की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन-2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्य:- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार
प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
दूरभाष सं.- ०११-२३६३५५९२, २०९२०३६३

ISSN-2347-1565

मूल्यम्- २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

अगस्त तः सितम्बर २०२२ पर्यन्तम्

वर्षम्-१०-संयुक्ताङ्कः-१-२

(वै0-२०७९)

( श्रावण-शुक्ल-चतुर्थी तः आश्विन-शुक्ल-पंचमी पर्यन्तम् )

सम्पादकः
डॉ. अरुणकुमार झा
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

सम्पादक सहायकः
मनोज कुमारः

आवरण/सज्जा
श्रीमती पूजा गड़ाकोटी



| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | भारतगौरवखण्डम् | डॉ. देवीसहाय पाण्डेयः "दीप" | १ |
| ३. | वैद्यो वदति बुद्धिमान् | डॉ. बलराम शुक्लः | ३ |
| ४. | अयि शातनाहतपादपाः | डॉ. नवलता | ४ |
| ५. | मनसि,भूरि शल्यानि मे | आचार्य ( प्रो. ) विन्ध्येवश्वेरी प्रसाद मिश्रो 'विनयः | ५ |
| ६. | भ्रूणकृतं मातृस्तोत्रम् | डॉ. हर्षदेवमाधवः | ६ |
| ७. | भारतदेशमहिमा | प्रो. भागीरथी नन्दः | ७ |
| ८. | संस्कृतवाङ्मये अन्तरिक्षविज्ञानम् | डॉ. शिवेश्वर उपाध्यायः | ८ |
| ९. | कपटदुर्ग-भेदने धृतव्रतः | डॉ. ओम प्रकाश ठाकुरः | १२ |
| १०. | कार्यविधिज्ञो निश्चिन्तः | ,, | १४ |
| ११. | विचित्रो दण्डः | डॉ. केशवरामः शर्मा | १७ |
| १२. | भारत पाक सम्बधयो अन्तरराष्ट्रिय महत्त्वम् | श्री मनोज कुमारः डिमरी | २० |
| १३. | व्यावहारिक संस्कृत | ,, | २१ |



दिल्ली संस्कृत अकादमी
( राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः )
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)
ई-पत्रिका

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 20920363


## सदस्यताशुल्कम्

प्रति-अङ्कम् : 25 रूप्यकाणि

वार्षिकम् : 250 रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : https://sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि सुरवाणीसमुपासकाः सहृदयाः!**

यस्मिन् देशे वयं देहधारणं कुर्मः स हि अस्माकं देशः जन्मभूमिः वा भवति। जननी इव जन्मभूमिः पूज्या आदरणीया च भवति। अस्याः यशः सर्वेषां देशवासिनां यशः भवति। अस्याः गौरवेण एव देशवासिनां गौरवम् भवति। ये जनाः स्वाभ्युदयार्थं देशस्याहितं कुर्वन्ति ते अधमाः सन्ति। देशभक्तिः सर्वासु भक्तिषु श्रेष्ठा कथ्यते।

अतः काले-काले विद्वांसः अनेकधा देशभक्तिगीतानि काव्यानि लेखानि च लिखितानि सन्ति। अतः संस्कृत चन्द्रिकायाम् अस्मिन् संयुक्ताङ्के भारतदेश महिमा, भारतगौरवखण्डम् इत्यादयः लेखाऽपि प्रकाश्यन्ते।

संस्कृत सुधियः पाठकाश्च निवेद्यन्ते यद् चन्द्रिकायाम् प्रकाशिताः शोधलेखाः, सामयिक-निबन्धाः, कविताः, कथाः, विनोद-वार्ताः, लघुनाट्यकृत्यादयो भवत कथं रोचन्ते? स्व विचार युक्त पत्राणि सम्प्रेश्यानुगृहन्तु। इति निवेदनम्।

भावत्कः

**शकाब्दः १९४४** **डॉ. अरुणकुमार झा**

सचिवः

# भारतगौरवखण्डम्

–डॉ. देवीसहाय पाण्डेयः ''दीप''



स्वर्गात्तु दिव्या महती विशाला
सुवन्दिता भारतवीरभूमिः।
सुशोभिता सागरमण्डलस्था
सिंहासनस्था महिषीव रम्या ॥१॥

धराधरो रम्यनगेश एष
हिमालयो दिव्यकिरीटमस्याः।
कश्मीरदेशः सुविशालभालो
विन्ध्यप्रदेशः कलमेखलेव ॥२॥

अंघ्रि[1]स्तु तस्यास्तमिलप्रदेशः
प्रक्षाल्यते सागरकिङ्करेण ।
विभाति लङ्का तलदेशलग्ना
पादारविन्दाच्च्युतवारिबिन्दुः ॥३॥

नगाश्च ये कूट[2]किरीटवन्त-
स्तुषारकर्पूरविलिप्तभालाः।
मेघोत्तरीयं विशदं विधाय
द्युलोकसभ्या इव ते विभान्ति ॥४॥

श्रीसत्त्वयुक्ता वनरम्यराजि
र्विराजते पर्वतपादलग्ना।
सुस्वप्नमग्ना परिलक्ष्यते सा
रोमाञ्चजुष्टा विटपच्छलेन ॥५॥



पतन्प्रपातो विशदाम्बुयुक्तः
प्रतीयते पर्वतपादपृष्ठे।
स्रस्तं यथा शोभनमुत्तरीय-
मं[3] सप्रदेशात्तु महीधरस्य ॥६॥

१. अंघ्रि = चरण। २. कूट = चोटी। ३. अंस = कंधा।

लतावितानास्तरवःप्रफुल्ला
युताश्च मिष्टैस्सुफलैर्मनोज्ञैः ।
छायां सुशीतां वितरन्ति लोके
क्लेशं विशेषं पथिकस्य हत्वा ॥७॥



अथ प्रभातप्रभया प्रकीर्ण-
मुषःपदालक्तक[1] रम्यरागम् ॥
दधाति दिव्यं गगनं प्रसन्नं
तडागमध्ये वदनं विलोक्य ॥८॥

परागरागः परितः प्रकीर्णः
फुल्लेन हेमाम्बुजभास्करेण ।
नीलाम्बरं रञ्जितमेव तेन
प्राच्यङ्गनायाः सुमुखं समस्तम् ॥९॥

आलोकलोकं विरचय्य लोके
कोकस्य शोकं शकलं[2] प्रकुर्वन् ।
करोति सूर्यः कलधौत[3]वर्णं
कलप्रभातं कमलाकरञ्च ॥१०॥

सितारविन्दस्य पुटे निषण्णः
करोति भृङ्गो मधुमिष्टपानम् ।
मरालमाला मुदिता मनोज्ञा
तटाकतीरे रमते रसाला ॥११॥



विभिन्नवर्णा विहगा विभान्ति
वरं सरस्ते परिपूरयन्ति ॥
प्रतीयते कोऽपि महोत्सवोऽस्ति
महाजनानामवली विचित्रा ॥१२।

-लवकुश नगरम्
रामघाटः, अयोध्या उत्तरप्रदेशः

---

१. अलक्तक = महावर। २. शकल = खण्ड । ३. कलधौत = सोना ।

# वैद्यो वदति बुद्धिमान्

-डॉ.बलराम शुक्लः

मारापस्माररहितं प्रेमोन्मादैरमन्दितम्।
रागस्यारोगिणं तूर्णं वैद्यगेहेऽपवाहयेत् ॥

अहंकारविकारान् ये स्वास्थ्यमित्यभिमन्वते ।
प्रेमातङ्कविहीनानां तेषामुल्लाघमर्थये॥

न कासांचन पृच्छानां मौनं यस्योत्तरायते ।
वदतामपि वादेषु निदानं त्वेडमूकता ॥

इहामुत्र न वा येषां चन्द्रद्वितयदर्शनम्।
अमीभ्यो दुष्टदृष्टिभ्यः सुदूरं परिदेवना ॥

येषां नोद्धाट्यते मुष्टिः करे कर्तुं करान्तरम्।
स्वर्णसम्पूर्णपाणीनां विलपामो दरिद्रताम् ॥

ये न संजीविताः प्रेम्णा श्वसन्तोऽपि चिरं मृताः ।
तेषां परेतकर्मार्थं पौरोहित्यं विदध्महे ॥

मृतेष्वपि तथैतेषु न मृता इति घोषयेत्।
म्रियन्ते जीविता एव मृतानां मरणं कुतः ? ॥

प्रीतिहीनं मृतं वीक्ष्य वैद्यो वदति बुद्धिमान्।
शरीरं मृतमेतर्हि पूर्वमेव मृतात्मनः॥



# अयि शातनाहतपादपाः

-डॉ. नवलता

अयि शातनाहतपादपा विपिनेऽद्य दूयध्वे कथम् ।
शाखासु नूतनपल्लवानां हास आगन्ता पुनः ॥

अन्धन्तमोविस्तारिणी संत्रासदा व्येष्यति निशा।
प्राणप्रदो भास्वत्करो दिग्भास आगन्ता पुनः ॥

नत्युन्ती जगति प्रवर्तितकालचक्रमयीगती।
ह्रासोऽस्ति चेदस्मिन् क्षणे सुविकास आगन्ता पुनः॥



प्राणान्तके समुपस्थिते चेदुत्कटास्ति जिजीविषा
दिष्ट्या कदाचिद्गतः प्रत्याश्वास आगन्ता पुनः ॥

चेज्जीर्णपत्राणि क्षरन्ति न मन्यतामिति जीवनं
नवचेतना नवजीवनस्योद्भास आगन्ता पुनः ॥

पुष्पोद्गमैः भरिताञ्चला भूयः समृद्धिरिहेष्यति
भ्रमरावलीनां गुञ्जितेन विलास आगन्ता पुनः॥

शीतलसुगन्धसमीरणः किल नोत्स्यते तरुपल्लवान्
नृत्यल्लतावनसङ्कुलेऽप्युल्लास आगन्ता पुनः॥

सर्वासु दिक्षु यशःश्रुतिं पवनोदितं सम्प्रेषयन्
पृथिवीतलञ्चोन्मादयन् शुचिवास आगन्ता पुनः॥

येऽकिञ्चनत्वमवेक्ष्य यौष्माकीनमद्य पतत्रिणो
याताऽचिरेण तदुन्मदानां रास आगन्ता पुनः ॥

भूयो रविष्यति कोकिलोऽस्मिन् कानने मदनिर्भरः
सर्वत्र महिमानं किरन् मधुमास आगन्ता पुनः ॥

# मनसि, भूरि शल्यानि मे

-आचार्य ( प्रो. ) विन्ध्येवश्वेरी प्रसाद मिश्रो 'विनयः'

प्रतप्त पृथिवीतलं सलिलमाविलं स्रोतसां
दिशः सततधूसरा वियददभ्रधूमायितम् ।
विधुर्विधुरतां गतो रविरभास्वरोरोहितो
युगेऽतिविषमेऽधुना मनसि भूरिशल्यानि मे ॥१॥



सदूषणसमीरणोऽप्यशुचिमापितः पावको
बलादृतुविपर्ययो विफलतां गता सत्कृषिः॥
अकाल जलदावली क्वचिदवर्षणं तर्षणं
युगेऽतिविषमेऽधुना मनसि भूरि शल्यानि मे ॥२॥

कुनेतृभिरनारतं जनततेरुपच्छन्दनं
प्रयुज्य परिधर्षणं मतकृतेऽनृतालम्बनम्।
प्रवल्गित महार्घता नृषु च भूतिभोगस्पृहा
युगेऽति विषमेऽधुना मनसि भूरि शल्यानि मे ॥३॥

जनैर्विपणिकर्म्मणि हयपपदार्थसम्मिश्रणं
कलासु कुणपाकृतिर्विकृतिमग्नता नग्नता।
अपूज्यजनपूजनं सरलतालताकृन्तनं
युगेऽति विषमेऽधुना मनसि भूरिशल्यानि मे ॥४॥

अधर्मरतदाम्भिकै रुचिरसत्कथाकीर्त्तनं
प्रवञ्चन विचक्षणैः शुचि समाजसेवाव्रतम्।
अपण्डितमहाभटैः शठतया च शास्त्राहवो
युगेऽति विषमेऽधुना मनसि भूरि शल्यानि मे ॥५॥



# भ्रूणकृतं मातृस्तोत्रम्

-डॉ. हर्षदेवमाधवः

त्वद् वासनानां फलमस्ति नैव
न यौवने ते दुरित-प्रसूतिः ।
भ्रष्टोऽस्मि नैवास्मि तथा प्रभ्रष्टः
प्राप्तोऽस्मि गर्भाशयमन्दिरं ते ॥

फलं मया प्राक्तनपुण्यप्राप्तं
तवापि मातः! सफला तपस्या ॥
पितुश्च श्रद्धाऽस्मि तथा ह्यमोघा
मातः! प्रविष्टस्त्वयि व्याकुलोऽहम् ॥

वात्सल्यधारा त्वमसि प्रसन्ना
सृष्टेरियत्ता ह्यमृतस्य दिव्या ।
अक्षुण्णस्नेहस्य च पुण्यस्रोतः
पयोनिधिस्त्वं करुणा-रसस्य ॥

गङ्गाऽसि शान्ता यमुनाऽसि शुभ्रा
कदाप्यलुप्ता च सरस्वती त्वम् ।
वात्सल्यरेवा सुमतेः पयोष्णी
पवित्रता त्वं परमा नदीनाम् ॥



# भारतदेशमहिमा

-प्रो. भागीरथी नन्दः

हे विप्रोत्तम! पुष्पचन्दनकरः श्वेताजिरे मन्दिरे
संरुद्धे परितः कुतो नियमयन् स्तुत्या च तान् ध्यायसि।
येषामिन्द्ररवित्रिविक्रममहावैश्वानराणां श्रुतौ
व्याप्तिर्विश्वकदम्बके निगदिता मद्देशजैः पूर्वजैः ॥१॥



ते नद्यां गगने गिरौ जलनिधौ देवास्तरौ मन्दिरे
कान्तारे भुवि चैत्यहर्म्यनिचयेऽपूणे च पर्णाश्रमे।
दीने वित्तधने पतङ्गतनुषु स्थित्वा पशौ पक्षिणि
स्वानन्त्यं प्रथयन्त्यहो प्रियतमं देशस्य मे दर्शनम् ॥२॥

एकः स्यां बहु विश्वमेकसदनं सर्वे लभन्तां सुखं
सर्वे सन्तु निरामया नहि भवेत् कश्चित्पुनर्दुःखभाक्।
इत्याद्यैर्वचसां शतैः प्रतिपदं सम्प्रेरिता मानवाः
सर्वानेव समान् वयं क्षितितले मन्यामहे सादरम् ॥३॥

# संस्कृतवाङ्मये अन्तरिक्षविज्ञानम्

-डॉ. शिवेश्वर उपाध्यायः

विश्वस्य प्राचीनतमे साहित्ये ऋग्वेदादीनां संहिता-ब्राह्मण-उपनिषद् ग्रन्थेषु ज्योतिषविषयकम् अंतरिक्ष विज्ञानं विशदं वर्णितमस्ति। ऐतरेयब्राह्मणे (११/६) द्यौपृथिव्योर्मध्ये अन्तरिक्षं स्यादिति वर्णनमस्ति-

**द्यौरन्तरिक्षे प्रतिष्ठिता अन्तरिक्षं पृथिव्याम्।**




एवमेव ऋग्वेदस्य पुरुषसूक्ते विश्वस्य त्रयो भागाः वर्णिताः -

**नाभ्या आसीदन्तरिक्षं शीर्ष्णोद्यौः समवर्तत पद्भ्यां भूमिः।**

संस्कृतवाङ्मयस्यादौ तु वेदस्योपलब्धिरिति सर्वेषां विदुषामेव मतिः। समग्रं विज्ञानं वेदेषु उपलब्धमिति भारतीयानां विदेशीनां च मतम्। वेदानामर्थबोधाय हि वेदाङ्गानां परिकल्पना संजाता। मुण्डकोपनिषद् ग्रन्थे वेदवेदाङ्गानां दशविद्यानां गणना तु अपराविद्यायां कृता अस्ति । उक्तं यथा-

**द्वे विद्ये वेदितव्ये परा चैवापरा च।**
**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदः अथर्ववेदश्च॥**
**शिक्षा कल्पो व्यकरणं निरुक्तं छन्दो ज्योतिषम्॥**

संस्कृतवाङ्मये गणितस्य खगोलविज्ञानस्य च महद् विधानं वेदाङ्गत्वेन स्वीकृते कल्पसूत्रे ज्योतिषशास्त्रे च रचितं सुरक्षितं चाधुना। उक्तं यथा आश्वलायन गृह्यसूत्रे -

**ध्रुवमरुन्धतीं सप्तर्षीनिति दृष्ट्वा वाचं विसृजेत् ॥**

बौधायन सूत्रे -

**मीनमेषयोर्मेषवृषभयोर्वसन्तः।**

वेदाङ्गत्वेन स्वीकृते निरुक्तशास्त्रे अपि अन्तरिक्षविषयकानि तत्त्वानि दृष्यन्ते-

**उद्यन्नादित्यः। सर्वेषां ज्योतिषां राजा। सप्तऋषीणानि ज्योतीषि।**

अत्रोच्यते वेदाङ्गेषु ज्योतिषम् -

**ज्योतींषि प्रतिपाद्यन्ते यस्मिन्नित्यर्थे-अर्श आदिभ्यो अच् इति सूत्रेण निष्पन्नतया ज्यौतिषशब्दो ज्योतिः प्रतिपादकं साङ्केतम्।**

**द्योतन्ते प्रकाशन्ते ग्रहनक्षत्रादीनि अनेन इति द्युतेरिषण्णादेश्च जः इति उणादिनिष्पन्नोऽयं शब्दः।**

**ज्योतिः सूर्यादीनां ग्रहाणां गत्यादिकं प्रतिपाद्यतया अस्त्यस्येति अच्। वेदाङ्गशास्त्रविशेषः।**

संस्कृतवाङ्मये वेदचक्षुः स्वरूपं ज्योतिश्शास्त्रं तु सिद्धान्त-संहिता-होरा-स्कन्धरूपं त्रिधा विभक्तमस्ति। उक्तं यथा नारदेन -

**सिद्धान्तसंहिताहोरा रूपस्कन्धत्रयात्मकम् ।**
**वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमकल्मषम् ।**

वराहमिहिरेणाप्युक्तं बृहत्संहितायाम्-

**ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं**
**तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता ।**
**स्कन्धे अस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ**
**होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ॥**



तत्रापि सिद्धान्तस्कन्धे हि कालविधानं गणितविधानं खगोलविज्ञानं चेति विशदं निरवशेषं वर्णितमस्ति। उक्तं यथा सिद्धान्त शिरोमणौ भास्कराचार्येण -

**त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमात्**
**चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।**
**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**
**सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ॥**

वेदवाक्येषु अपि ज्योतिषां ग्रहनक्षत्राणामुल्लेखः स्पष्टमेवास्ति -

**यज्जाग्रतो दूरमुदैति दैवंदु सुप्तस्य तथैवैति।**
**दूरङ्गमंज्योतिषांज्योतिरेकंतन्मेमनः शिवसङ्कल्पमस्तु ॥**
**श्रीश्च्चतेलक्ष्मीश्च्चपत्न्यावहोरात्रे पाश्र्वनक्षत्राणि रूपमश्चिवनौव्यात्तम् ॥**

तैत्तिरीयब्राह्मणेतु नक्षत्रशब्दस्य व्युत्पतिरपि दृष्यते -

**प्रबाहुर्वा अग्रे क्षत्राण्यातेपुः। तेषामिन्द्र क्षत्राण्यादत्त।**

**नवा इमानि क्षत्राण्यभूवन्निति। तन्नक्षत्राणां नक्षत्रत्वम्।**

अत्र नक्षत्राणि नक्षतेर्गतिकर्मणः इति निरूपणं कृतं निरुक्ते यास्काचार्येणापि। ज्योतिषदृष्ट्यापि 'न क्षरति न गच्छति 'इति नक्षत्रम्' अथवा गतेः अभावत्वं नक्षत्रत्वमिति' 'क्षत्' गत्यर्थक-धातुना सिद्धिर्भवति। पुनश्च 'नक्षू' गत्यर्थक धातुनापि सिध्यति यत् तन्नक्षत्रं यस्मिन् ग्रहाः संचरन्ति।

अस्मिन् विषये तैत्तिरीय ब्राह्मणे हि स्पष्टमुक्तं यथा-

**सलिलं वा इदमन्तरासीत्। यदतरन्। तत्तारकाणां तारकत्वम्। यो वा इह यजते।**

**अमुँ सलोकं नक्षते। तन्नक्षत्राणां नक्षत्रत्वम्। देवगृहा वै नक्षत्राणि। य एवं वेद।**

**गृह्येव भवति। यानि वा इमानि पृथिव्याश्चित्राणि। तानि नक्षत्राणि।**

अत्र देवगृहा वै 'नक्षत्राणि इदं वाक्यं महत्त्वपूर्णमस्ति।' 'गृह्णातीति ग्रहः' अनया व्युत्पत्या इदं ज्ञायते यत् नक्षत्रेषु संचारमानाः प्रत्यक्षमानाः प्रकाशमानाश्च ग्रहाः वैदिकग्रन्थेषु देवाः कथिताः। यथा -'सूर्यो देवता चन्द्रमा देवता' इत्यादिकं तु जानन्त्येव सर्वे।

ग्रहाणामुत्पत्तिविषये ऋग्वेदे प्रमाणमत्र-

**चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायत ॥**

**बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ॥**

**अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसोविमाने ॥**

अथर्ववेदे अपि वर्णनमत्र-

उत्पाताः पार्थिवान्तरिक्षाः शं नो दिविचरा ग्रहाः। शं नो भूमिर्वेप्यमाना शमुल्कानिर्हतं च यत्। नक्षत्रमुल्काभिहतं शमस्तु । शन्नो ग्रहाश्चान्द्रमसाः शमादित्यश्च राहुणा । शन्नो मृत्युर्धूमकेतुः शं रुद्रास्तिग्म तेजसः।

सूर्यसिद्धान्ते आर्षग्रन्थेऽपि सुस्पष्टं वर्णनं कृतम् -

**अथ सृष्ट्यां मनश्चक्रे ब्रह्मा अहंकारमूर्तिभृत् ।**

**मनसश्चन्द्रमा जज्ञे सूर्यः अक्ष्णोस्तेजसां निधिः ॥**

**अग्नीषौमौ भानुचन्द्रौ ततस्त्वङ्गारकादयः ।**

**तेजोभूखाम्बुवातेभ्यः क्रमशः पंच जज्ञिरे ।**

अन्तरिक्षे ग्रहकक्षानिर्धारणं सूर्यसिद्धान्ते कथितम् -

**ब्रह्माण्डमध्ये परिधिर्व्योमकक्षा अभिधीयते ।**

**तन्मध्ये भ्रमणं भानामधो अधः क्रमशस्तथा ॥**

**मन्दामरेज्य - भूपुत्र - सूर्य शुक्रेन्दुजेन्दवः ।**

**परिभ्रमन्त्यधो अधःस्थाः सिद्धा विद्याधरा घनाः ॥**

आर्यभटेनापि आर्यभटीय ग्रन्थे –

**भानामघश्शनैश्चरसुरगुरुभौमार्कशुक्रबुधचन्द्राः ।**
**तेषामधश्च भूमिर्मेधीभूता मध्यस्थाः।**

एवमेव भारतीयस्य ज्योतिश्शास्त्रस्य सर्वेषु सिद्धान्तग्रन्थेषु ग्रहगति विषयकाः नियमाः सुष्ठुः वर्णिताः सन्ति। गजकतरङ्गिणीग्रन्थे–सूर्यः **पितामहो व्यासो वसिष्ठो अत्रिः पराशरः** इति कश्यपवचनात् ज्ञायते यद् अष्टादशेषु ज्योतिषप्रवर्तकेषु व्यासो अपि विद्यमानः। व्यासेन स्वकीये महाभारत ग्रन्थे आरण्यकपर्वणि ग्रहाणां संचारः राशिनक्षत्रेषु प्रदर्शितः। नूनम् एषोपलब्धिः संस्कृतवाङ्मये साहित्ये भारतीयेतिहासे च महत्त्वपूर्णा अस्ति । यथा –

**यदा चन्द्रश्च सूर्यश्च तथा तिष्यबृहस्पती ।**
**एकराशौ समेष्यन्ति प्रपत्स्यति तदा कृतम् ॥**
**कालवर्षी च पर्जन्यो नक्षत्राणि शुभानि च ।**
**प्रदक्षिणा ग्रहाश्चापि भविष्यन्त्यनुलोमगाः ॥**

गृह्यते अनेनेति व्युत्पत्त्या ग्रहणशब्दस्य सिद्धिर्भवति। ग्रहणमपि द्विविधं सूर्यचन्द्रयोर्भेदात्। ग्रहणविषयकाः नियमाः ज्योतिषसिद्धान्त ग्रन्थेषु स्पष्टं वर्णिताः। ग्रहणस्योल्लेखो वेदग्रन्थे महाभारतग्रन्थे च प्राप्तः । एतेषां विषयाणां चर्चा विस्तरेण आले हि भविष्यतीति ।

**–अध्यक्षः ज्योतिषविभागः**
**शासकीय स्नातकोत्तर संस्कृत महाविद्यालयः**
**रायपुर ( छत्तीसगढ़म् )**

# कपटदुर्ग-भेदने धृतव्रतः

-ओम् प्रकाश ठाकुरः

एकदा तेनालीरामः मासत्रयस्य अवकाशं गृहीत्वा बद्रीनाथस्य यात्रायै गतवान्। तस्यानुपस्थितौ मन्त्री, सेनापतिः, अन्ये प्रमुखा अधिकारिणश्च स्वर्णावसरं मत्वा मुमुदिरे ।

एकस्मिन् अहनि मन्त्री राज्ञे न्यवेदयत्, यत् सीमान्तक्षेत्रेषु शत्रूणाम् आक्रमणभयं सर्वदा वर्तते। यदि तत्र काचित् सुदृढा व्यवस्था क्रियेत तदा सीमान्तवासिनी प्रजा निर्भया सुखिनी च भवेत्। भूपालस्तद्वचनं मूल्यवद् अवधार्य योजनां निर्मातुम् आदिष्टवान्। मन्त्रिसहचरैः त्वरितमेका योजना निरमीयत। अनुमानितधनराशिव्ययम् उल्लिख्य योजनापत्रकं राजसेवायां प्रस्तुतं राज्ञा च तदर्थे स्वीकृतिः प्रदत्ता।

अथ मन्त्रिमण्डल्या निज-सम्बन्धिनः, सुदूर-सम्बन्धवन्तो बान्धवाश्च तस्मिन् बृहति योजनाकार्ये नियोजिताः। इदानीं धनस्य अतिमात्रम् अपव्ययः प्रारभत। मन्त्रि प्रभृतीनां धनकोषाः पुष्टिममजन्। योजनमन्तरेण पृष्टे सति मन्त्रिवरो ब्रूते स्म यद् देशस्य सीमा हिमाद्रिसदृशी शत्रुभयान्मुक्ता भविष्यति।

इत्थं मासद्वयं गतम्। तृतीयमासस्य आरम्भ एव तेनालीरामो यात्रायाः प्रत्यावृत्तः। सीम्नि प्रविष्टमात्र एव स सर्वम् अवगतवान् यत् मन्त्रि सेनापतिभृतयः राजकोषात् धनमाहृत्य आहृत्य निजं धनकोषं समेधयन्ति। सीमासुरक्षाव्याजेन तैः सीमान्त-ग्रामा ध्वस्ताः कृषिभूमयः विनाशिताः तत्रत्या जनता च अत्याचारैः प्रपीडिता। सर्वतोदिशम् अराजकता विराजते। दण्डभीत्या कोऽपि राजसमक्षं गन्तुं साहसं न विभर्ति।



**यो भृत्यवर्गेऽस्ति निषक्तचक्षुः**
**समीक्षते कार्यविधिं विधिज्ञः ।**
**न कोऽपि तं वञ्चयितुं समर्थः**
**पदे पदेऽन्यो विपदां शरव्यः ॥**



तेनालीरामेण सधैर्यं सीमावर्तिनां जनानां कष्टकथा: श्रुता:। परमेकल: स किं कुर्यात्? कथंकारं प्रबोधयेद् राजानम्। बहु विचार्य तेनैक उपायो दृष्ट:। स सीमान्तवासिभ्य: सुगुप्तम् एकां युक्तिं प्रकथ्य ततो निर्गत:।

अवकाशान्ते समागतस्य तेनालीरामस्य स्वागतं याहृत्य भूपोऽभाषत- भो। तवानुपस्थितौ अस्माभि: एकं बृहत् कार्यं निर्व्यूढम्। एकां विशालयोजनां निर्माय राज्यस्य सीमा अभेद्या सुरक्षिता च व्यधायि। सम्प्रति तत्र निवासिनी प्रजा निर्भयं ससुखं च स्थास्यति ।

तेनालीरामो निजगाद-महाराज! इदम् अति प्रशस्यं कर्म भवता कृतम्। सीमान्तवासिनो भवतो जयघोषं कुर्वन्ति। अहं मन्त्रिवर्याय वर्धापनं प्रयच्छामि। तद्वचो निशम्य मन्त्री परमाह्लादितो जात:। किञ्चिद् विरम्य तेनालीरामेण अभिहितम् यद् रिपुभीतिविमुक्ता: तत्तद्ग्रामवासिन: एकस्या नाटकमण्डल्या स्थापनां कृतवन्त:। भवान् कलामर्मज्ञ: अतस्ते तस्या उद्घाटनं भवता क्रियमाणं समीहन्ते। कृष्णदेवराय: मुदा उद्घाटनार्थे स्वीकृतिं प्रादात्, राज्यस्य रंगशालायां च आयोजनं निश्चितम् अभवत्। तस्मिन् समारोहे महाराज: परिवारेण सह तत्र समाययौ। राज्यस्य प्रतिष्ठिता नागरिका अन्यश्च कर्मचारिवर्ग: तत्र निमन्त्रिता अभवन्।

नाटकमारब्धम् किन्तु तत्र सीमान्तवासिनाम् उपरि अत्याचार-दृश्यांकनम् आसीत्। मध्ये मध्ये विदूषक: राजसमक्षमागत्य ब्रूते स्म यत् शत्रुभ्योऽधिकं वयम् आत्मीयेम्य: सन्त्रस्ता: स्म:। त्रायतां त्रायतां न:।

एतद्विलोक्य दर्शका व्याकुला अभवन् मन्त्रि-सेनापति-पुरोहितादय: क्षोभमापद्यन्त। रोषारुणनयनो नृप: तेनालीरामम् अवदत्-किमेतत् प्रस्तूयते?

सोऽवदत्-अस्मिन् विषये अहमपि अनभिज्ञोऽस्मि। सीमान्तवासिन: एव प्रष्टव्या:। रंगशालायाम् एव राज्ञा सर्वं पृष्टम्। सीमान्तप्रदेशीया: विस्तरेण अत्याचार निवेदयामासु:। कुपितेन राज्ञा केचिद् अधिकारिण: स्वपदेभ्य: च्याविता:। मन्त्रिप्रभृतय: भूरिभि: अर्थदण्डैर्दण्डिता:। तेनालीरामम् पुरस्कारै: सम्मानयन् नृप: उवाच राजनीतौ त्वादृश: कुशलो नास्ति।



# कार्यविधिज्ञो निश्चिन्तः

**–डॉ. ओम् प्रकाश ठाकुरः**

एकदा महीपतिः कृष्णदेवरायः अमरकण्टकस्य यात्रायै गतवान्। तस्य सहयात्रिषु प्रमुखाः सभासदः अंगरक्षकाश्च आसन्। तत्र नर्मदाया उद्गमस्थलेऽसौ कस्यचित् निमीलित–नयनस्य ध्यानमग्नस्य योगिनः दर्शन–सौभाग्यमविन्दत्। योगिनो मृगचर्मासनं तु भूमौ आसीत्, किन्त्वसौ भूमेः हस्तप्रमाणम् उच्चैः शून्येऽवस्थितः प्रणवजपे निरतः आस्त।



अलौकिकेन दृश्येनानेन विस्मयं गतो महीपालः समासद्भिः साकं तं श्रद्धया प्रणनाम। मुहूर्तानन्तरं स योगी नेत्रे उन्मील्य शनैः भूमौ स्वासनमध्यतिष्ठत्। ततस्तान् सर्वान् विलोकयन् नृपतिमपृच्छत्– अपि कुशली त्वं कृष्णदेव ।

नृपतिः ओम्–इत्युक्त्वा सविनयमब्रवीत्–किन्तु.....। अर्धोक्ते एव योगी जगाद, जानामि यदभिधित्ससि। अद्यत्वे विजयनगरसाम्राज्यं वित्तसंकटमेघैराच्छन्नं वर्तते। अरातीनाम् अनारतम् आक्रमणैः त्वदीयः राजकोषो रिक्ततां प्रयातः।

तन्निशम्य राज्ञो मस्तकम् आनतं जातम्। तदा योगिना एक कंसं दत्त्वा तं नर्मदाजलेनापूर्य आनेतुं भूपतिरादिष्टः। भूपतिना जले समानीते स योगी तस्मिन् जले तर्जनीं प्रक्षिप्य मन्त्रमुच्चार्य तं कंसं राज्ञे समर्पयन् अवदत्–राजन्! अभिमन्त्रितेन एतेन वारिणा कोषागारे सप्तदिनानि प्रोक्षणं कुरु। रिक्तः कोषः पूर्णतां यास्यति। अग्रेऽपि सदा परिपूर्णः एव स्थास्यति, किन्तु अवहितो भवेः यत् जलं कंसे एव तिष्ठेत्।

कंसं प्राप्य राज्ञो हृदयं प्रफुल्लं जातम्। ततोऽसौ जलपूर्णं कंसम् अवधानपूर्वं शिविरमानीतवान् राजधानीं प्रति प्रस्थातुं चादिष्टवान्। आदेशं प्राप्य प्रस्थानसज्जा प्रारभत्। रथेषु अश्वा अयोज्यन्त सर्वः वस्तुसंभारः रथेषु निवेशितः किन्तु नृपतेश्चित्तम् उद्विग्नम् आसीत्। राजानं चिन्तातुरं वीक्ष्य अमात्यादयः

राज्ञाऽभाषि–राजधानीं प्रति गामिनि एतस्मिन् सुदीर्घे विषमे नतोन्नते च मार्गे इदमभिमन्त्रितं जलं कथं नीयेत? एतत्तु विषमे यात्रामार्गे संघट्टादिना धूलिसाद् भविष्यति। समस्या विकटा आसीत्। अस्मिन् प्रत्यवायभूयिष्ठे यात्रापथे जलस्य सुरक्षितं प्रापणम् असम्भवं प्रतीयते स्म।

राज्ञा सर्वे सभासदः इदं दायित्वं वोढुं कथिता, किन्तु कोऽपि दायित्वग्रहणे तत्परो नाभूत्। केवलं तेनालीरामः आसीद् अवशिष्टः। सोऽपि शयानः विश्रामं कुरुते स्म। इदं दुष्करं कार्यं सम्पादयितुं स न प्रभविष्यति इति मत्वा नृपस्तं न पृष्टवान्, किन्तु तेनालीरामः प्रबुद्धो भूत्वाऽवदत्–महाराज! करणीयस्य कार्यस्य अभावे अहं शयानः आसम्। यदि मह्यम् अभिमन्त्रितं जलं रक्षार्थं प्रदीयते तदा सम्भवतः निद्रा मां स्ववशे न विधास्यति।

महीपतिरुवाच–जलसंरक्षणदायित्वग्रहणात् पूर्वं त्वया विचारणीयं, यत् जले अल्पतां गते पतिते वा तव शिरश्छेदो भविष्यति। जलपूर्णं कंसं हस्तेन धारयन् तेनालीराम उवाच –निश्चिन्तो भवतु भवान्। जलं सुरक्षितं स्थास्यति। प्रस्थानाय आदेशः दीयताम् ।

ततो राज्ञः आदेशेन सर्वे रथाः विजयनगरं प्रति प्रस्थानं चक्रुः। यात्रापथे सर्वे जलपात्रस्य सुरक्षाविषये चिन्तातुरा आसन् विशेषतः कृष्णदेवः। यदा यदाऽसौ रथं निरुध्य जलपात्रविषये अवगन्तुम् अंगरक्षकान् प्रैषयत्, तेऽसूचयन् यत् तेनालीरामः रथे शयानोऽस्ति, जलपात्रं च तत्र न दृश्यते।

मन्त्रिपुरोहित–सेनापतयः इमं समाचारं निशम्य मुदिता अभवन्। तेनालीरामः नूनं यमपुरं प्रस्थास्यते इति विचिन्त्य तेषां मनः प्रफुल्लम् आसीत्। सेनापतिः तेन पथा रथं नयति स्म, यत्रत्या भूमिः विशेषेण उद्घातिनी आसीत्।



विजयनगरं प्राप्य सर्वे विश्वसन्ति स्म यत् जलस्य सुरक्षितता तु आकाशकुसुमायितमिव, जलपात्रमपि खण्डितं भग्नं वा भवेत्। राजभवनस्य पुरतः रथेऽवरुद्धे महीपतिः सैनिकान् आदिशत् यत् तेनालीरामं प्रबोध्य वदन्तु यत् स मह्यं जलपूर्णं पात्रं प्रयच्छतु। यथा यथा, सैनिकाः तेनालीरामं प्रति प्रवर्धन्ते स्म, सभासदः चिन्तयन्ति स्म, यत् यमदूताः तमुपयान्ति। सैनिकेषु प्राप्तेष्वपि तेनालीरामः शयानः आसीत्। तैः प्रबोधितः सन् स कराभ्यां चक्षुषी स्पृशन् उदतिष्ठत्। नृपतेराज्ञां श्रुत्वा रथस्य उपरितने भागे स्थापितं निजं स्यूतमादाय सम्राजं प्रति प्रचचाल। जलपात्रस्य स्थाने स्यूतधारिणं तेनालीरामं विलोक्य भूपोऽभाषत– मया जलपूर्णं पात्रमानेतुम् आदिष्टोऽसि न तु स्यूतम् ।

अन्नदातः! जलपात्रम् आनीतवान् अस्मि– इत्युक्त्वा तेनालीरामः स्यूताभ्यन्तरे हस्तं प्रक्षिप्य जलपूर्णं पात्रं निष्कास्य महीपतेः पुरतः स्थापितवान्। पात्रं वीक्ष्य सर्वे विस्मय–विमुग्धा अभवन्। नृपः कदाचित् स्यूतं पश्यति स्म, कदाचित् पात्रम्। ततः चकितचकितो भूत्वा भूपालस्तमवदत्– केन विधिना त्वया स्यूते स्थापितं जलपात्रं सुरक्षितमकारि? यदि इदं रहस्यं विवृणोषि, त्वदीयम् अभिवाञ्छितं मनोरथं पूरयेयम्। तेनालीरामः सस्मितं निजस्यूतात् गुब्बारासंज्ञकम् उत्पतनकं निःसार्य अदर्शयत् अकथयच्च, मया जलपात्रम् अस्मिन् उत्पतनके स्थापितम् आसीत्। उत्पतनकस्य मुखं वर्धकेन (रबड इति भाषायां) दृढतया पिनद्धम् । एवं जलं सुरक्षितमकारि मया ।

तेनालीरामस्य विलक्षणां युक्तिं विज्ञाय नृपः गर्वोन्नतः सन् प्राह–इदं विजयनगरं त्वां स्मृत्वा सदा गर्वान्वितं भविष्यति। प्रार्थयस्व, किं समीहसे? सोऽवदत्–भवत्कृपामेव समीहे। भूपस्तं पर्यष्वजत। तेषां सर्वेषां सभासदां शिरांसि लज्जावनतानि जातानि, ये यात्रापथे तस्य अनिष्टमीहन्ते स्म ।

**कार्यं भवेन्महद् वा लघु वा भवेत् प्रकामं**
**सर्वे न तस्य शक्ताः सम्पादनेऽभिरामम् ।**
**पुंसां परं स वन्द्यः लोकेऽर्जितप्रतिष्ठः**
**दुष्करविधेयजातं यो लीलया विधत्ते ॥**



# विचित्रो दण्डः

**-डॉ. केशवरामः शर्मा**

रामनगराधिपः **'श्यामसिंहो'** विजयनगरेश्वरो **'वीरसिंहश्च'** प्रतिवेशिनौ भूत्वापि शत्रुभावापन्नौ स्तः। ईर्ष्याभावेन दग्धौ तौ अहर्निशं युद्धार्थं तत्परौ, क्लेशेन कालं नयतः। ताभ्यां प्रजायाः सुखं शान्तिश्च गौणातिगौणविषयौ स्तः। तौ आत्मरक्षार्थमात्मसम्मानार्थञ्च सततं यत्नशीलौ। द्वयोरपि राज्ययोर्विकास-कार्याणि अवरुद्धानि। राजकोषस्याधिकांशधनम् अस्त्रशस्त्रयोर्निर्माणे क्रये च विनष्टं भवति। यः कोऽपि स्वप्रतिद्वन्द्विनमसावधानं पश्यति, स एव यथाशीघ्रमाक्रमणं करोति। तयोर्वीरसिंहो विशेषेण क्रूरोऽस्ति।

रामनगरराज्यं तुलनात्मकरूपेण सुरक्षितमस्ति। यतो हि तत्रत्यैः शिल्पकारैः संवेदनशीलस्थलेषु एतादृशा विशिष्टाः स्तम्भा निर्मिताः सन्ति, येषां साहाय्येन सन्देशप्रेषणं सुलभमस्ति। तेषां सम्बन्धो राजकुमार्याः **'सुशीलाया'** भवनस्थस्वर्णनिर्मितघण्टिकाभिः सह अस्ति। सीमारक्षकबलस्य सजगप्रहरिणो यदा शत्रुसैनिकानां स्वराष्ट्रेऽतिक्रमणं पश्यन्ति, तदा ते स्तम्भानां माध्यमेन सन्देशं प्रेषयन्ति। तत्क्षणमेव सुशीलाभवने घण्टिकानादेन सर्वे सन्नद्धा भवन्ति वीरसैनिकास्तस्यामेव आशायां गत्वा शत्रूणामभियानं निष्फलं कुर्वन्ति।

वीरसिंहः परमखिन्नोऽस्ति, यतो हि तस्य सुविचारिता अपि बहवः प्रयासा विफला जाताः। बहुप्रयासैर्गुप्तचरैः रहस्यमिदं ज्ञातं, यत्तेषां विशिष्टस्तम्भानां सम्बन्धो राजकुमार्या भवनस्थघण्टिकाभिरस्ति। स तासां विनाशार्थं चिन्तातुरोऽस्ति। म्लानमुखं पितरं दृष्ट्वा एकदा राजकुमार 'मधुर'-स्तस्य क्लेशकारणं पृच्छति। सर्वं वृत्तान्तं ज्ञात्वा स इदं कार्यं सम्पादयितुं प्रस्तुतो भवति ।

स्वकार्यक्रमस्य निर्धारणं कृत्वा, पितुराज्ञाञ्च लब्ध्वा स वेशपरिवर्तनं कृत्वा निभृतरूपेण रामनगरं प्रति गच्छति। मधुरो वीणावादने परमकुशलोऽस्ति। यथा-तथा राजसभां गत्वा स स्वकलायाः प्रदर्शनं करोति। तस्य वीणावादनं कृष्णस्य वंशीवादनमिव परमाह्लादकारकं माधुर्यभावपूर्णं सम्मोहनशीलञ्चाऽस्ति। सर्वे श्रोतारो मन्त्रमुग्धा इव चिरकालादतृप्तकर्णपुटैः अमृतधाराया इव संगीतरसस्य पानं कुर्वन्ति।



यदा सा संगीतधारा शान्ता भवति, तदा सर्वे लुण्ठिता इव अनुभवन्तो जाताः, 'पुनरपि' 'पुनरपि' इति प्रार्थनां कुर्वन्ति। नृपस्याऽऽज्ञया स पुनरपि कलायाः प्रदर्शनं करोति। सर्वेऽभिमन्त्रिता इव सभायां तस्य केनापि रूपेणोपस्थितिं वाञ्छन्ति। महाराजश्यामसिंहस्तस्य परिचयं पृच्छति। स आत्मानं विलासनगर-निवासिनं 'मधुर' इत्यभिधानं क्षत्रियपुत्रं ज्ञापयति। नृपाज्ञया स राज सेवायां नियुक्तो भवति। तस्य निवासस्य भोजनादिकानाञ्च समुचिता व्यस्था जाता।

यदा सम्राज्ञ्या **'शान्तया'** मधुरस्य वीणावादनस्य प्रशंसा श्रुता, तदा तया नृप उक्तो यत् राजकुमार्याः सुशीलायाः शिक्षणार्थं स वीणावादको नियुक्तः करणीयः। नृपादेशान्मधुरः सायंकाले राजकुमार्याः शिक्षणार्थं नित्यप्रतितस्या भवनं गच्छति। मधुरो यथा नाम तथा गुणो वाण्या, स्वरूपेण, व्यवहारेण च सर्वथैव मधुरोऽस्ति। मासद्वयस्य प्रयासेनैव सुशीला वीणावादने प्रवीणा भवति।

मधुरस्य शालीनतया प्रभाविता सम्राज्ञी सुशीलाया मनोभावं ज्ञात्वा महाराजं निवेदयति, यत् मधुरः सर्वथा सुशीलाया अनुकूलो वरोऽस्तियदि तस्मै रोचते स तस्य मनोभावं पृच्छतु। अपरेद्युर्नृपेण आहूतो मधुरस्तस्य पार्श्वं गच्छति। श्यामसिंहः तस्य समक्षं सुशीलायाः प्रणयप्रस्तावं तस्य मनोभावं पृच्छति।

**मधुरः**- अहमनेन प्रस्तावेनाऽनुगृहीतोऽस्मि, किन्तु स्वपित्रोरनुज्ञां किमपि वक्तुं समर्थो नास्मि। शीघ्रमेवाऽहं तयोरनुज्ञाग्रहणाय यतिष्ये।

**श्यामसिंहः**- अहं प्रसन्नोऽस्मि, तव जनकेन सह वार्तालापं च कर्तुमिच्छामि।

**मधुरः** - शीघ्रमेव स भवतां समीपमागमिष्यति।

अपरेद्युः सायंकाले मधुरः सुशीलां कथयति, यत् सा वीणावादने प्रवीणा सञ्जाता। इदानीं तथा तस्मै किमपि वस्तुजातमुपायनरूपेण दातव्यम्।

**सुशीला** - अहं भवतां कृतज्ञाऽस्मि। यत्किञ्चिदपि भवानिच्छति तदाज्ञापयतु।

**मधुरः** - अस्मिन् भवने सुसज्जिता इमाः स्वर्णिमघण्टिका मह्यमतीव रोचन्ते। यदि भवती किमपि दातुमिच्छति, तर्हि मह्यमेतदेवोपायनं रोचते।

**सुशीला** - आसां देशस्य रक्षार्थमतीवमहत्त्वमस्ति, अतो घण्टिकानां प्रदानं ममायत्तं नास्ति। भवान् किमप्यन्यद् वस्तुजातं गृहीतुं प्रसीदतु।

**मधुरः**- एतादृशस्याऽपमानस्य मया कल्पनापि न कृताऽऽसीत्। इदानीमहं भवत्याः किमपि नेच्छामि।



सुशीला किङ्कर्तव्यविमूढा भवति । पुनश्च तस्य प्रणयभावं विचिन्त्य तस्मै घण्टिका ददाति। स च सतर्को भूत्वा ताभिः सह स्ववासस्थलं गच्छति। घण्टिकास्तत्रैव सुरक्षितस्थले निधाय, निशाया अन्धकारे परिवर्तितवेशेन विजयनगरं प्रति गच्छति, स्वजनकाय च सर्वं वृत्तातं निवेदयति। तौ स्वविशालसेनया सह तस्यामेव निशायां रामनगरमाक्रान्तं कुरुतः।

सीमारक्षकैः विशिष्टैः स्तम्भैः राजभवने सन्देशः प्रेषितः, किन्तु घण्टिकानामभावे तत्प्रयत्नं निष्फलं जातम्। शत्रवोऽनायासेनैव नगरे प्रविष्टाः। तत्रस्थैः सैनिकैस्तैः सह सङ्घर्षः कृतः, किन्तु असन्नद्धास्ते शीघ्रमेन पराजिता भवन्ति।

आकस्मिके युद्धे स्वपराजयं श्रुत्वा महाराज श्यामसिंहः सुशीलाया भवनं गच्छति। तत्र घण्टिका न दृष्ट्वा स राजकुमारीं तासामभावस्य कारणं पृच्छति। सा मधुरस्य दुराग्रहं तस्मै निवेदयति। स्वापराधं स्वीकृत्य च पित्रा निर्धारितदण्डार्थं नतमस्तका भवति।

नृपः क्रोधेन तस्या उपरि खड्गप्रहारं कर्तुं यतते। वीरसिंहः तस्य हस्तं गृह्णाति। कथयति च–"मधुरो ममैव पुत्रोऽस्ति। सुशीलाया दण्डस्य व्यवस्थामहमेव करोमि। अद्य प्रभृतीयं मधुरस्य स्नेहरज्ज्वा बद्धा स्वजीवनं यापयिष्यति। आवां च मित्रताया: पाशे बद्धौ भविष्यावः।''

[मधुरः करबद्धः श्यामसिंहस्य पादौ पतति। स च तमुत्थाप्याऽऽश्लिष्यति।]

**मधुरः** – अहं भवतामपराध्यस्मि। स्वधृष्टतायाश्च दण्डमिदानीमेवेच्छामि। [नतमस्तकस्तिष्ठति।]

**श्यामसिंहः**–तव दण्डस्य निर्धारणमहं करोमि। त्वं सुशीलायाः स्नेहरज्ज्वा बद्धः स्वजीवनं यापयिष्यति।

**वीरसिंहः** – वयस्य! आगच्छ, इदानीमावां शत्रुभावं विहाय स्नेहपाशे बध्नावः।

[श्यामसिंहस्याऽऽलिङ्गनं करोति ।]

**श्यामसिंहः**–

**बद्धौ प्रणयसूत्रेण सुशीलामधुराविमौ।**
**आपदानां विनाशाय कल्याणाय भविष्यतः॥**
**अनयोः स्नेहभावेन चिन्ता नष्टा भविष्यति।**
**शत्रुभावं हि कष्टाय प्रीतिः करोति निर्भयम्॥**

अनेन सम्बन्धेन आवयोः प्रजा सुखिनी भविष्यति। आवाञ्च निर्भयौ भूत्वा स्वप्रजायाः सुसमृद्ध्यर्थं यतिष्यावहे।

**सर्वे जनाः**– महाराजः श्यामसिंहो जयतु। महाराजो वीरसिंहो जयतु। नवदम्पती सुशीलामधुरौ जयताम् ।

**–बी–५९ ,वीथिसंख्या–३**
**इन्दिरानिकेतनम्, उत्तरीछज्जूपुरम्,**
**शाहदरा, देहली–११००९४**

# भारत पाक सम्बधयो अन्तरराष्ट्रिय महत्त्वं

**–मनोज कुमारः डिमरी**

समग्रे धरातले मानवानाम् जीवनं एकं उच्चतमं स्थानम् वरीवर्तन्ते। वस्तुतः परस्पर एकान्यः सम्बन्धः मैत्री रूपेण भवितव्यम्।

यद्यपि भारते अनेकानेक विशिष्ट वर्गाणां स्थानं वर्तते। परञ्च च नकोऽपि केषाञ्चित् वर्गसमुदायं च परस्पर वाद–विवाद न प्रचलति।

पराधीनतया पूर्वकं अस्माकम् भारतवर्षे अनेकानेक शासकानाम् शासनम् आसन्। विजानन्तु भवन्तः यत् चिरकालपर्यन्तं अस्माकम् भारतवर्षः मुगलानाम् आङ्गलानाञ्च आधीनमासीत् । तस्मिन्काले अनेकानि आक्रमणानि भूत्वा भारतस्य संस्कृतिः सभ्यताश्च हननं अभवन् । शनैः शनैः स्वतन्त्रता रक्षणाय भारते अनेके महापुरुषाः स्व बलिदानं दत्वा स्वतन्त्रताया ज्योतिं भारते प्रज्ज्वालितम्। अनेके महापुरुषयो महद्सहयोगेन बलिदानेनैव सप्तचत्वारिंशतउत्तरएकोनविंशति शतं ख्रिष्टाब्दे अगस्त मासस्य पञ्चदश दिनाङ्के अस्माकम् भारतवर्षः स्वतन्त्रताभूत्।

भौतिके युगे मानवस्य दिनचर्या अतीव व्यग्ररूपा अस्ति। प्रतिदिनं अहोरात्रम् वा मानवाः निजकार्यवसात् स्व–स्व कार्यं प्रति निमग्ना सन्ति। कीदृशी तेषाम् शारीरिकी अवस्था वर्तन्ते ते एव जानन्ति। ऐषां व्यवस्था वस्तुतः सामान्तया समस्तेषु राष्ट्रेषु निर्धारिता अस्ति परञ्च एतादृशी व्यवस्था यदि विश्व मानसपटले जायते वा तर्हि कथं केन प्रकारेण मानवाः मानवस्य प्रति वक्र दृष्टिम् अवलोक्यन्ते दृश्यन्ते वा।

यदि परपीडनं परिदुःखितं परशमनमयी च भावना मानवस्य हृदये आगता सन्ति तर्हि कथं जन कल्याणं वा समाजकल्याणं, राष्ट्रकल्याणं च सक्षमः भविष्यन्ति।

विजानन्तु भवन्तः अस्माकम् भारतीय संस्कृतिः पुराकालादेव "सर्वे भवन्तु सुखिनः" संगच्छध्वं संवदध्वं.........," सहनाभवतु........ मा विद्विषावहै।" इत्यादयः कल्याणमयी भावना समेषां प्राणीनां स्वः स्वः मनांसि निधाय निज कार्याणि कर्तव्यानि वा करिष्यन्ति स्मः। तस्मिन् विचारधाराया परस्पर रूपे कश्मिश्चिद् स्थाने नकोऽपि हिंसा नकोऽपि विचारवैमनस्यम् नहि एव कोऽपि परिवादकाः निवसन्ति स्मः।



वर्तमाने पुराकालीनमयी संस्कृति स्वरूपं पूर्णरूपेण परिवर्तनमाना जायन्ते। मानवः प्रति हिंसामयी दृष्टि केन प्रकारेण अपरस्य कार्यं पूर्णं न जातम् मनोमालिनम् रचनाम् करणीयम्।

एतादृशी घटना पञ्चदश वर्ष पूर्वम् जाता यदा माननीया भारतीय प्रधानमन्त्री श्री अटल विहारी वाजपेयी महाभागाः भारत पाक सम्बन्धानाम् सुदृढम् करणाय सकटा माध्यमेन लाहोरं प्रति गच्छति परञ्च ते पाक दुरविचारिणः दुराचारिणः अनीतिज्ञः क्रूढभ्रष्ट राजनेता मैत्री मार्गं परित्यज्य दुस्साहसेन कारगिल क्षेत्रे छद्म रूप माध्यमेन आक्रमणम् अकरोत्। यतोहि परिणाम स्वरूपं ते एव साफल्यं न जाताम्।

आन्तराष्ट्रिय स्तरे भारत पाक सम्बन्धान् सुदृढ करणाय समये-समये राष्ट्रस्तरे वार्ता अभवत्। तेषां क्रमे ताशकन्द शिमला सन्धि, आगरा शिखर वार्ता अनेनानेक वार्ता महद् प्रयासेनऽपि विफलतां गताः। किमस्मि कारणम् अत्र किम कारणेन वार्ताः सफलतां न गता किमर्थं अहर्निशं आवालवृद्धानाम् निर्दोषानाम् निरपराधानाम् संहारम जातम्।

केन्द्र सर्वकारेण यद्यपि अथकप्रयासेन जम्मू कश्मीर समग्रे क्षेत्रे चिरकालादेव शान्तिमयी वार्ता करणाय अनेकानैक वार्ताः अकारोत् परञ्च तस्या वार्ताया कोऽपि प्रभावः न दृश्यते अन्ततोगत्वा तस्य फलस्वरूपे सम्पूर्णे क्षेत्रे अशान्तं घोषयति।

उपयुक्ता समस्याया पृष्ठे एकमेव कारणं धर्मस्य मतमतान्तरम् धार्मिकी विचारधारा द्वेषपूर्णा भावना शान्ति करणाय शान्ति स्थापनायाम् अवरोधका वर्तन्ते।

विचार्यतां भवन्तः - यद्यपि भारतपाक सम्बन्धयो मैत्रीपूर्णम् न वर्तते तदपि शान्ति प्रयासं नित्यसः क्रमेण आन्तराष्ट्रिय स्तरे विचारं विचारणीयम्।

जानन्ति एव भवन्तः

आन्ताराष्ट्रिय स्तरे पाकस्य स्थिति अतीव दयमानः दृश्यते, यतेहि पाकस्य विचारधारा राजनीति पक्षे अतीव निम्न स्तरीय भवति। यद्यपि अमेरिका, रूस, जापान, चीन, ब्रिटेन एतेषु सर्वेषु समुन्नतं राष्ट्रेषु पाकस्य आर्थिकी पक्षस्य समुन्नतं करणाय तेषांसह अनेकानेक वार्तां कुर्वन्तिस्मः परञ्च हिंस स्वभावेन विहिस्त्रसिंत खलः।'' इति भावनाय मनांसि धारणाय कथं शान्ति मार्गं प्रति गच्छति।''

उपर्युक्तां तथ्यानां सम्यगः रूपेण यावत् काल पर्यन्तं न विचार्यतां तावत् काल पर्यन्तं आन्ताराष्ट्रीय स्तरे भारतपाक सम्बन्धयो मैत्रीमयी सद्भावना कथं सम्भाव्यते।

**-सम्पादक सहायकः**
**दि.सं.अ.**

# व्यावहारिक-संस्कृत-वाक्यानि

मम स्वास्थ्यं समीचीनं नास्ति।
महती पादवेदना।
सामान्यतः शिरोवेदना यदा तदा आगच्छति।
किञ्चित् ज्वरः इव.....।
वैद्यं पश्यतु।
मम वमनशङ्का।
वैद्यस्य निर्देशनं स्वीकरोतु।
किमर्थं कण्ठः अवरुद्धः?
अहम् अतीव श्रान्तः।
तस्य आरोग्यं कथम् अस्ति?
अद्य किञ्चित् सम्यक् अस्ति।
प्रातः आरभ्यः लघु शिरोवेदना।
आरोग्यं तावत् सम्यक् नास्ति।
वैद्यं कदा दृष्टवान्?
उत्साहः एव नास्ति भोः।
ह्यः तु स्वस्थः आसीत्।
किम् अद्य अहं भोजनं कर्तुं शक्नोमि?



## उपसर्ग युक्त धातुनाम् शब्दार्था:

**भू - होना ।**

भवति - होता है।

अनुभवति - अनुभव करता है।

अभिभवति - दबाता है, तिरस्कार करता है।

पराभवति - हराता है।

परिभवत - तिरस्कार करता है।

प्रभवत - पैदा होता है।

उद्भवति - उत्पन्न होता है, निकलता है।

आविर्भवति- प्रकट होता है।

प्रादुर्भवति - उत्पन्न होता है।

तिरोभवति - छिपता है।

सम्भवति - हो सकता है, उत्पन्न होता है।

**वद् - बोलना ।**

वदती - बोलता है।

अपवदति - अपशब्द बोलता है।

अनुवदति - अनुवाद करता है।

उपवदति - प्रार्थना करता है।

विवदते- झगड़ा करता है।

विप्रवदन्ते - विरुद्ध बोलते हैं।

प्रतिवदति - जवाब देता है।

संवदति- बात करता है।

संप्रमदन्ते - मिलकर बोलते हैं।

**हृ - ले जाना अथवा चुराना।**

हरति - ले जाता है।

अपहरति - चुराता है।

अनुहरित- नकल करता है।

परिहरति - छोड़ता है।

आहरति - लाता है, खाता है।

व्याहरति- बोलता है।

व्यवहरति - व्यवहार करता है।

प्रहरति - मारता है।

विहरति- विहार (सैर) करता है।

उपहरति - उपहार देता है।

उपाहरति, अहरति - लाता है।

उदाहरति - उदाहरण देता है।

**स्था- ठहरना, रुकना।**

तिष्ठति- प्रस्थान करता है। (आत्मनेपद)

उपतिष्ठते - उपस्थान करता है।

उत्तिष्ठति - उठता है।

संतिष्ठिते- मरता है। (आत्मनेपद)

**नी - ले जाना।**

नयति - ले जाता है।

अनुनयति - मनाता है।

परिणयति - विवाह करता है।

निर्णयति- निर्णय करता है।

अभिनयति - अभिनय करता है।

उपनयति - पास लाता है।

अपनयति - दूर करता है।

प्रणयति - प्रेम करता है।

**सरति - जाता है, सरकता है।**

अनुसरति- अनुसरण करता है

प्रसरित - फैलता है।

अपसरित - निकलता है।

अवसरित - हटता

**ईक्ष् - देखना ।**

ईक्षते - देखता है ।

उपेक्षते- लापरवाही करता है।

वीक्षते - (ध्यान से) देखता है।

प्रतीक्षते- प्रतीक्षा करता है।

समीक्षते- विमर्श करता है।
अन्वीक्षते- चिन्ता करता या मनन करता है।
अञ्च् - जाना या पूजा करना।
अञ्चति- जाता है, पूजा करता है।
प्राञ्चति - उन्नति होती है।
पराञ्चति - लौटता है।
**गृह - लेना।**
गृह्णाति- लेता है।
अनुगृह्णाति- कृपा करता है।
आगृह्णाति- छिपाता है।
दुरागृह्णाति - हठ करता है।
प्रतिगृह्णाति - दान लेता है।
निगृह्णाति- कैद करता है।
**चि- चुनना।**
चिनोति - चुनता है।
परिचिनोति- पहचानता है।
निचिनोति- इकट्ठा करता है।
उपचिनोति- बढ़ाता है।
अपचिनोति- घटाता है।
संचिनोति - संचित करता है।
अवचिनोति - चुनता है।
**ज्ञा- जानना।**
गम् - जाना ।
गच्छति- जाता है।
आगच्छति - आता है।
गच्छति- निकलता है।
अधिगच्छति - प्राप्त करता है।
प्रतिगच्छति- लौटता है।
उद्गच्छति- दूर हटता है।
**कृ - करना ।**
करोति - करता है।
अपकरोति - अपकार करता है।
अनुकरोति- नकल करता है।
विकुरुते - उच्चारण करता है।
विकुर्वते - विकार पैदा करता है।
तिरस्करोति - तिरस्कार करता है।
संस्करोति - संस्कार (सुधार) करता है।
प्रत्युपकरोति- प्रत्युपकार करता है।
प्रकुरुते - जबरदस्ती करता है।
उपकुरुते - चुगली करता है ।
चर - घूमना।
चरति- घूमता है या खाना खाता है।
विचरति- विचरण करता है।
उपचरति - ऊपर जाता है।
आचरति- आचरण करता है।
उपचरति- उपचार (इलाज) करता है।
अनुचरति - अनुसरण करता है।
संचरते- भ्रमण करता है।
अपचरति - विपरीत करता है।
व्यभिचरति - व्यभिचार करता है।
परिचरति - सेवा करता है।
**लप् - बोलना ।**
लपति- बोलता है।
विलपति - विलाप करता है।
प्रलपति - बकवाद करता है।
आलपति- बोलता है, आलाप करता है।
संलपति- वार्तालाप करता है।
अपलपति - छिपाता है।
**तृ - तैरना ।**
वितरति - देता है, बाँटता है।
उत्तरति - जवाब देता है।
संतरित - तैरता है, पार करता है।

**क्रम - पैदल चलना**
क्रमति- चलता है।
क्रमते - उत्साह करता है।
उपक्रमते - आरम्भ करता है।
विक्रमते - आगे बढ़ता है।
निष्क्रमति - निकलता है।
आक्रमति - ऊपर जाता या हमला करता है।
अपक्रमति - हटता है।
**अय् - जाना।**
अयते - जाता है।
पलायते - भागता है।
व्ययते - खर्च करता है।
निरयते - निकलता है।
दूरयते - दुखी होता है।
दुलयते - काँपता है।
निलयते- विलीन होता है।
**अस्- फेंकना।**
अस्यति- फेंकता है।
अपास्यति- दूर करता है।
अध्यस्यति - आरोप करता है।
निरस्यति- हटाता है।
व्युदस्यति- निकालता है।
परास्यति- परास्त करता है।
समस्यति - संक्षिप्त करता है।
विन्यस्यति- स्थापित करता है।
**पद- चलना, जाना ।**
पद्यते- जाता है।
संपद्यते- सुखी होता है।
उत्पद्यते - पैदा होता है।

## शब्दार्था:

## भोज्यानि उपस्कर -साधनानि च

**सन्धानम्** - अचार
**यवानिका** - अजवाइन
**आर्द्रकम्** - अदरक
**अम्लिक, चिञ्चा**- इमली
**सूक्ष्मेला** - इलाचयी (छोटी)
**आम्लकम्** - आमला
**क्षोद:, अट्टम्** - आटा
**क्वाथिता** - कड़ी
**मरिचम्, कोलकम्**- मिर्च
**हिमसन्तानिका**- कुल्फी
**खमीर** - किण्व:, मासर
**खदिर:** - खैर, कत्था
**गोधूम:** - गेहूँ
**घृतम्** - घी
**अवलेह:** - चटनी
**चणक** - चना
**चर्पटी, रोटिका** - चपाती
**तण्डुल:** - चावल
**सिता, शुक्ला** - चीनी
**जातीफलम्** - जायफल
**जीरक:** - जीरा
**यव:** - जौ
**भाजी** - तरकारी
**दलितान्नम्** - दलिया
**सूप:** - दाल
**अमिक्षा** - पनीर
**नवनीतम्** - मक्खन
**तक्रम्** - मट्ठा

# शब्द-रूपम्

## नकारान्त युवन् ( जवान ) पुल्लिंग

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | युवा | युवानौ | युवानः |
| द्वितीया | युवानम् | युवानौ | यूनः |
| तृतीया | यूना | युवभ्याम् | युवभिः |
| चतुर्थी | यूने | युवभ्याम् | युवभ्यः |
| पञ्चमी | यूनः | युवभ्याम् | युवभ्यः |
| षष्ठी | यूनः | यूनोः | यूनाम् |
| सप्तमी | यूनि | यूनोः | युवसु |
| सम्बोधनम् | हे युवन्! | ये युवानौ! | हे युवान्ः! |

## सकारान्त पुम्स् ( पुरुष ) पुल्लिंग

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पुमान् | पुमांसौ | पुमांसः |
| द्वितीया | पुमांसम् | पुमांसौ | पुंसः |
| तृतीया | पुंसा | पुंभ्याम् | पुंम्भिः |
| चतुर्थी | पुंसे | पुंभ्याम् | पुंम्भ्यः |
| पञ्चमी | पुंसः | पुंभ्याम् | पुंम्भ्यः |
| षष्ठी | पुंसः | पुंसोः | पुंसाम् |
| सप्तमी | पुंसि | पुंसौः | पुंम्सु |
| सम्बोधनम् | हे पुमन्! | हे पुमांसौ ! | हे पुमांसः! |

## तकारान्त स्त्रीलिंग-सरित् ( नदी )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सरित् | सरितौ | सरितः |
| द्वितीया | सरितम् | सरितौ | सरितः |
| तृतीया | सरिता | सरिद्भ्याम् | सरिद्भिः |
| चतुर्थी | सरिते | सरिद्भ्याम् | सरिद्भ्यः |
| पञ्चमी | सरितः | सरिद्भ्याम् | सरिद्भ्यः |
| षष्ठी | सरितः | सरितोः | सरिताम् |
| सप्तमी | सरिति | सरितोः | सरित्सु |
| सम्बोधनम् | हे सरित्! | हे सरितौ ! | हे सरितः! |

## सकारन्त-नपुंसकलिंग मनस् ( मन )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | मनः | मनसी | मनांसिः |
| **द्वितीया** | मनः | मनसी | मनांसिः |
| **तृतीया** | मनसा | मनोभ्याम् | मनोभिः |
| **चतुर्थी** | मनसे | मनोभ्याम् | मनोभ्यः |
| **पञ्चमी** | मनसः | मनोभ्याम् | मनोभ्यः |
| **षष्ठी** | मनसः | मनसोः | मनस्साम् |
| **सप्तमी** | मनसि | मनसोः | मनः सु |
| **सम्बोधनम्** | हे मनः ! | हे मनसी! | हे मनांसिः! |

## चकारान्त वाच् ( वाणी ) स्त्री.

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | वाक्-ग् | वाचौ | वाचः |
| **द्वितीया** | वाचम् | वाचौ | वाचः |
| **तृतीया** | वाचा | वाग्भ्याम् | वाग्भिः |
| **चतुर्थी** | वाचे | वाग्भ्याम् | वाग्भ्यः |
| **पञ्चमी** | वाचः | वाग्भ्याम् | वाग्भ्यः |
| **षष्ठी** | वाचः | वाचोः | वाचाम् |
| **सप्तमी** | वाचि | वाचोः | वाक्षु |
| **सम्बोधनम्** | हे वाक्-ग्! | हे वाचौ ! | हे वाचः! |

# धातुररूपम्
## भी ( डरना )

### ( लट् लकार )

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुष-** | बिभेति | बिभतः | बिभेतु |
| **मध्यमपरुष-** | बिभेषि | बिभीथः | बिभीथ |
| **उत्तमपुरुष-** | बिभेमि | बिभिवः | बिभीमः |

### ( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | बिभेतु | बिभीताम् | बिभ्यतु |
| मध्यमपरुष- | बिभिहि | बिभीतम् | बिभीत |
| **उत्तमपुरुष-** | बिभयानि | बिभयाव | बिभयाव |

( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | बिभियात् | बिभीयाताम् | बिभियुः |
| **मध्यमपरुष–** | बिभियाः | बिभीयातम् | बिभीयात |
| **उत्तमपुरुष–** | बिभियाम् | बिभीयाव | बिभियाम |

( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अबिभेत् | अबिभीताम् | अबिभयुः |
| **मध्यमपरुष–** | अबिभेः | अबिभीतम् | अबिभीत |
| **उत्तमपुरुष–** | अबिभयम् | अबिभीवः | अबिभीम |

( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | भेष्यति | भेष्यतः | भेष्यन्ति |
| **मध्यमपरुष–** | भेष्यसि | भेष्यथः | भेष्यथ |
| **उत्तमपुरुष–** | भेष्यामि | भेष्यावः | भेष्यामः |

## जि ( जय् ) जीतना

( लट् लकार )

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष–** | जयति | जयतः | जयन्ति |
| **मध्यमपरुष–** | जयसि | जयथः | जयथ |
| **उत्तमपुरुष–** | जयामि | जयावः | जयामः |

( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | जयतु,जयतात् | जयताम् | जयन्तु |
| **मध्यमपरुष–** | जय,जयतात् | जयतम् | जयत |
| **उत्तमपुरुष–** | जयानि | जयाव | जयाम |

( विधिलङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | जयेत् | जयेताम् | जयेयुः |
| **मध्यमपरुष–** | जयेः | जयेतम् | जयेत |
| **उत्तमपुरुष–** | जयेयम् | जयेव | जयेम |

( लङ्ग लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अजयत् | अजयताम् | अजयन् |
| **मध्यमपरुष–** | अजय: | अजयतम् | अजयत |
| **उत्तमपुरुष–** | अजयम् | अजयाव | अजयाम |

( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | जेष्यति | जेष्यत: | जेष्यन्ति |
| **मध्यमपरुष–** | जेष्यसि | जेष्यथ: | जेष्यथ |
| **उत्तमपुरुष–** | जेष्यामि | जेष्याव: | जेष्याम: |

## इण ( जाना )

( लट् लकार )

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष–** | एति | इत: | यन्ति |
| **मध्यमपरुष–** | एषि | इथ: | इथ |
| **उत्तमपुरुष–** | एमि | इव: | इम: |

( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | एतु,इतात् | इताम् | यन्तु |
| **मध्यमपुरुष–** | इहि,इतात् | इतम् | इत |
| **उत्तमपुरुष–** | अयानि | अयाव | अयाम |

( विधिलिङ्ग लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | इयात् | इयाताम् | इयु: |
| **मध्यमपुरुष–** | इया: | इयातम् | इयात |
| **उत्तमपुरुष–** | इयाम् | इयाव | इयाम |

( लङ्ग लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | ऐत् | ऐताम् | आयन् |
| **मध्यमपुरुष–** | ऐ: | ऐतम् | ऐत |
| **उत्तमपुरुष–** | आयम् | ऐव | ऐम |

### ( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | एष्यति | एष्यतः | एष्यन्ति |
| **मध्यमपरुष–** | एष्यसि | एष्यथः | एष्यथ |
| **उत्तमपुरुष–** | एष्यामि | एष्यावः | एष्यामः |

## दुह ( दुहना ), परस्मैपदी

### ( लट् लकार )

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष–** | दोग्धि | दुग्धः | दुहन्ति |
| **मध्यमपरुष–** | धोक्षि | दुग्धः | दुग्ध |
| **उत्तमपुरुष–** | दोह्मि | दुह्वः | दुह्मः |

### ( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | दोग्धु | दुग्धाम् | दुहन्तु |
| **मध्यमपरुष–** | दुग्धि, | दुग्धम् | दुग्ध |
| **उत्तमपुरुष–** | दोहानि | दोहावः | दोहाम |

### ( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | दुह्यात् | दुह्याताम् | दुहयुः |
| **मध्यमपरुष–** | दुह्याः | दुह्याथाम् | दुह्ययात |
| **उत्तमपुरुष–** | दुह्याम् | दुह्यावः | दुह्याम |

### ( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | अधोक्,अधोग् | अदुग्धाम | अदुहन् |
| | अधोक्,अधोग् | अदुग्धम् | अदुग्ध |
| | अदोहम् | अदुह्वः | अदुह्म |

### ( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष–** | धोक्ष्यति | धोक्ष्यतः | धोक्ष्यन्ति |
| **मध्यमपरुष–** | धोक्ष्यसि | धोक्ष्यथः | धोक्ष्यथ |
| **उत्तमपुरुष–** | धोक्ष्यामि | धोक्ष्यावः | धोक्ष्यामः |

**–सम्पादक सहायकः**
**दि.सं.अ.**

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

# "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347—1565 )

संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की बाल- मासिक पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत-चन्द्रिका"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२३६३५५९२, २०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित